PARIPEX - INDIAN JOURNAL OF RESEARCH | Volume-7 | Issue-7 | July-2018 | ISSN - 2250-1991 | IF : 6.761 | IC Value : 86.18

ORIGINAL RESEARCH PAPER | Sanskrit

# रूपकलक्षणग्रन्थानुसारं नायिकाभेदः स्वरूपश्च

KEY WORDS:

**Dr. Ch.sumalatha** R.S.Vidyapeetha, Tirupati

ABSTRACT

संस्कृतसाहित्यजगति साहित्यस्य सृष्टिः मुख्यतया द्विविधा भवति दृश्यश्रव्यभेदेन। तत्रापि रूपकसाहित्यं प्रधानाङ्गरूपत्वेन विराजते। लोकप्रियत्वदृष्ट्या यदि परिशीलयामस्तर्हि संस्कृतसाहित्ये रूपकाणि अग्रस्थानं प्राप्स्यन्ति। दर्शनश्रवणगुणाभ्यां रूपकाणि पण्डितपामरानपि समानदृष्ट्या आकृष्य आनन्दसम्मोहान् जनयन्ति। 'सकलकलासमाहारं रूपकम्' इति कृत्वा न केवलमेतदानन्ददायकानि अपि तु विज्ञानदायकान्यपि भवन्ति।

संस्कृते रूपकाणां वैशिष्ट्यम्-

संस्कृतनाटकानि देवानां मानवानाञ्च आदर्शजीवनं चित्री कुर्वन्ति। संस्कृतनाटकेषु नायकः धीरोदात्तः, सर्वगुणसम्पन्नः, आदर्शगुणवान्, सर्वसमर्थश्च भवति। संस्कृतनाटकानि प्रधानतया सव्यासव्यानां, धर्माधर्माणां, न्यायान्यायानां विषये देवासुर पराक्रम-सङ्घर्षणानि चित्रत्वेन परिदृश्यमानानि भवन्ति। अन्तिमे सत्यस्य, धर्मस्य, दैवत्वस्य च विजयप्राप्तिं नाटककारैः प्रदर्श्यते।

दशरूपकाणां परिचयः-

दशरूपकग्रन्थे दशरूपकाणां विषये इत्थं प्रतिपादितम् धनञ्जयेन -

नाटकमथप्रकरणं भाणव्यायोगसमवकारडिमाः।
ईहामृगा'वीथ्यः प्रहसनमिति रूपकाणिदश॥ (दशरूपकम्.,१/८)

काव्यस्य वस्तु - नेता-रसः इत्येतान् त्रीन् भेदकानाधारीकृत्य दशरूपकाणि भवन्तीति लक्षणकारैः प्रोक्तानि। तानि नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः, व्यायोगः, समवकारः वीथी अ':, ईहामृगश्च।

रूपकेषु नायिकाभेदाः स्वरूपञ्च -

नायकलक्षणे 'नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः' इत्यादयो नायकसामान्यस्य ये गुणाः प्रतिपादिताः सन्ति त एव गुणाः प्रायः नायिका सामान्यस्यापि भवन्तीति पृथग्गणना नैव कृताऽस्ति। सामान्यगुणेषु सर्वासु नायिकासु प्रसक्तेष्वपि स्वस्वभाववशात् नायिका अप्यनेकप्रकारकाः भवन्तीति सामान्येन त्रिषु भेदेषु विभक्तः-

१) स्वकीया, २) अन्या (परकीया), ३) साधारणा चेति। यथोक्तम् 'स्वान्या साधारणस्त्रीति तद्गुणा नायिका त्रिधा'। यथा नामतः एव स्पष्टमस्ति यथाशास्त्रं विवाहिता स्वीया भवति। केनचिदन्येन विहिता स्त्री अविवाहिता कन्या वा स्वानुरक्ता परकीया भवति। या सर्वजनगम्या सा साधारणा स्त्रीति कथ्यते।

स्वीयानायिका -

शील-पातिव्रत्य-लज्जादिगुणयुक्ता नायिका स्वीयेति कथ्यते। अस्याः लक्षणं यथा 'स्वीया शीलार्जवादियुक्ता' इत्यादि।

स्वीयनायिकाभेदाः-

इयं स्वीया नायिका स्वगुणानुरूपं त्रिधा विभक्ताऽस्ति' १) मुग्धा, २) मध्या, ३) प्रगल्भा चेति।

'मुग्धा मध्या प्रगल्भेति स्वीया शीलार्जवादियुक्'।

(दशरूपकं,प्रकाः-२,श्लो.१५)

१) मुग्धा -

ुग्धा यस्यां नायिकायां यौवनस्य कामभावस्य च प्रारम्भावस्था भवति। यथा या रात्रौ विपरीतचरणा (रतिभीतेति) मृदुक्रोधशीला अर्थात् सरलेनैवोपायेनापनीत क्रोधस्वभावा भवति सा नायिका मुग्धेत्युच्यते। एवञ्च वयोमुग्धा, काममुग्धा, रतवामा मृदुकोपा, इति अस्याः चतस्रः अवस्थाः भवन्ति।

२) मध्या-

मध्या स्वीयानायिकास्वन्यतमा भवति। या नायिका प्राप्तपूर्णयौवनावस्था प्राप्तपूर्णकामभावना च भवति तथा मोहान्ते यावत् सुरतक्षमा भवति सा मध्येति कथ्यते। एवं मध्या पूर्णयौवना, पूर्णकामवती, मोहान्तसुरतक्षमेति सामान्येन त्रिधा दृश्यते।

३) प्रगल्भा -

यौवनान्धा स्मरोन्मत्ता प्रगल्भा दयिता'के।
विलीयमानेवानन्दाद्रतारम्भेऽप्य चेतना॥ (दशरूपकम्, प्रकाश.३, श्लो.१८)

अर्थात् प्रगल्भा नायिका सा भवति यस्यां यौवनस्योद्गजस्य प्रवाहो भवति। यौवन प्रवाहेन सा अधा (विवेकहीना) इव जायते। स्मरस्यापि तथा प्रगाढतमोद्वेगो भवति यथा तथा सा मत्ता इव आचरति। अस्याः गाढयौवना, यौवनान्धा, भावप्रगल्भा, सुरतप्रगल्भा, लज्जाविहीना इत्याद्यनेके प्रकाराः दृश्यन्ते।

१) यौवनान्धा-यस्मिन् वयसि नायिका स्मृत्यौवनवती इति गृह्यते योवनादुद्भूतकामवशात् लोकस्पृहां विसृज्य भावान्धा भवति सा यौवनान्धा गतयौवना इति कथ्यते।

२) भावप्रगल्भा- या नायकस्य सामीप्यं प्राप्य यद्वा नायकस्य स्मरणमात्रेणैव तद्भावमग्ना जायते सा भावप्रगल्भेति कथ्यते।

३. सुरतप्रगल्भाः- सखीभिः नायकेन सह कृतां क्रीडाविधिं पृष्टा या सर्वमकृत्वाऽपि चतुरतया किञ्चिन्नैव कथयति सा सुरतप्रगल्भा।

४. लज्जाविहीना-या त्यक्तलज्जा सुरतक्रीडायां प्रवृत्ता भवति सा लज्जाविहीना प्रगल्भेति कथ्यते।

अन्या परकीया लक्षणं तद्भेदाश्च -

यथाविधि परिणीता शास्त्रसम्मता नायिका स्वीया भवति। तदतिरिक्ता तेन नायकेन अपरिणीताऽपि तत्रानुरक्ता नायिका अन्येति कथ्यते। इयमन्या द्विविधा १)अपरिणीत-कन्यका, २) अन्येन परिणीता कन्यका।

१) अपरिणीतकन्यका - यदा विवाहात्पूर्वं काचित्कन्या कश्चिन्नायक प्रेम्णा वाञ्छति तदा तस्य नायकस्य कृते साऽनुरागवती, किन्तु अविवाहिता कन्या अन्या स्त्री इति कथ्यते। अस्योदाहरणं तु सर्वत्रैव काव्येषु नाटकेषु च बाहुल्येन द्रष्टुं शक्यते।

२) अन्यपरिणीता स्त्री - या काचिन्नायिका अन्येन परिणीता अन्यं कामयते सा अपरिणेतुः कृते अन्या स्त्री इत्येव कथ्यते।

साधारणनायिका -

कलाप्रागल्भ्यधौर्त्यादिगुणैर्युक्ता नायिका साधारणेति कथ्यते। इयमेव गणिकाऽप्युच्यते।

नायिकानामष्टाऽवस्थाः-

ये खलु नायिका परकीयासाधारणेत्यादयो यद्वा मुग्धामध्याप्रगल्भादयो नायिकानां भेदाः प्रतिपादिताः सन्ति ताः सकला अपि नायिका स्वस्वावस्थाभेदात्। पुनरपि नानाभेदतां यान्ति।

'आसामष्टावस्थाः स्युः स्वाधीनपतिकादयः' एवञ्च अष्टानाम् अवस्थानां भेदात् पूर्वोक्तानां सर्वासामपि अष्टौ भेदाः भवन्ति।

१) स्वाधीनपतिका, २) वासकसज्जा, ३) विरहोत्कण्ठिता, ४) खण्डिता, ५) कलहान्तरिता, ६) विप्रलब्धा, ७) प्रोषितभर्तृका, ८) अभिसारिका चेति। पूर्वं ये भेदाः मुग्धामध्याप्रगल्भादयः प्रतिपादितास्सन्ति तेऽपि अवस्थामूलका एव। एतेऽपि स्वाधीनपतिकादयोऽवस्थादि विषयाः निरूपिताः सन्ति। एवञ्च भूयो भूयो नानाप्रकारेणावस्थानिरूपणं कथमिति विशेष जिज्ञासायामुच्यते। नायिकात्वसामान्यमादाय निरूपिताः सन्ति। एवञ्च भूयो भूयो नानाप्रकारेणावस्थानिरूपणं कथमिति विशेष जिज्ञासायामुच्यते। नाकयत्विसामान्यमादाय निरूपिताः मुग्धादयो नायिकाभेदाः अवस्थामूलकाः अपि धर्मिरूपाः सन्ति। एते तु स्वाधीन पति कादयो धर्मरूपाः इति। धर्मिपदेनात्र विशेष्यमुच्यते, धर्मपदेन च विशेषणमिति मुग्धादयो भेदाः विशेष्यभूताः स्वाधीनपतिकादयोऽवस्थाः विशेषरूपाः इति पृथक् प्रतिपादिताः सन्ति।

१) स्वाधीनपतिका-यस्याः नायिकायाः पतिः तत्समीपमेव तिष्ठति तथा तदधीनो भवति, एवमेव नायक सामीप्यमवाप्य हृष्टा भवति सा स्वाधीनपतिकेत्युच्यते। 'आसन्नायत्तरमणा हृष्टा स्वाधीन भर्तृका' (दशरूपकम्, प्रकाशः.२, पृ.५५, कारिका.२३)

२) वासकसज्जा - क्वचित् स्थानान्तरगते नायके तदागमनकाले या हृष्टा सती स्वात्मानं सर्वात्मना सुसज्जयति श्रृंगारादिभिः गृहञ्च स्वच्छतया समुचितस्थाने वस्तुसन्निवेशादिभिः सुसज्जयति सा वासकसज्जेति कथ्यते।

'मुदा वासकसज्जा स्वं मण्डयत्येष्यति प्रिये'।

(दशरूपकम्, प्रकाशः.२,पृ.५५,कारिका.२४)

३) विरहोत्कण्ठिता - अनागसेऽपि प्रिये आगमनकालाच्चिरयति सति सोत्कण्ठं या तं प्रतीक्षते सा विरहोत्कण्ठिता इति कथ्यते।

'चिरयत्यव्यलीके तु विरहोत्क्रण्ठिनो मनाः'।

(दशरूपकम्, प्रकाशः.२,पृ.५५)

४) खण्डिता - कृतापराधे नायके अन्यया सह सम्भोगचिादिकं दृष्ट्वा या ईर्ष्याकलुषिता जायते सा खण्डिता इति कथ्यते।

'ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता'।

(दशरूपकम्,प्रकाशः.२,पृ.५६,कारिका.२५)

५) कलहान्तरिता-या नायकेनापराधे कृते सति क्रोधवशीभूता नायकं तिरस्करोति पश्चाच्च नायकतिरस्कारकरणात् समधिकं पश्चात्तापं करोति सा नायिका कलहान्तरितेति कथ्यते।

'कलहान्तरिताऽमर्षाद् विधतेऽनुशायार्तियुक्'।

(दशरूपकम्,प्रकाशः.२,पृ.५६)

६) विप्रलब्धा-नायकेन दत्तसे्ते समये स्थाने वा केनचित् कारणविशेषेणानागते सति या स्वात्मनैवात्मानं न्यक्करोति। अति विमानितां वाऽनुभूयते सा विप्रलब्धा इति कथ्यते।

'विप्रलब्धोक्त समयमप्राप्तेऽपि विमानितम्'।

(दशरूपकम्,प्रकाशः.२,पृ.५६,कारिका.२६)

७) प्रोषित प्रिया-कार्यवशाद् यस्याः प्रियः कुत्रापि दूरदेशे तिष्ठति सा प्रोषितो देशान्तरङ्गतः प्रियो यस्याः सा इति व्युत्पत्त्या प्रोषितप्रिया इत्युच्यते।

'दूरदेशान्तरप्रियस्ये तु कार्यतः प्रोषितप्रिया'।

(दशरूपकम्,प्रकाशः.२,पृ.५६)

८) अभिसारिका -कामवशीभूता या नायकसमीपं गच्छति। स्वसमीपं नायकमेव वाऽऽह्वयति सा अभिसारिका इत्युच्यते। एषा तमोऽभिसारिका, ज्योत्स्नाभिसारिका इति द्विविधा।

'कामार्तऽभिसरेत्कान्तं सारचेद्वाऽभिसारिका'।

(दशरूपकम्,प्रकाशः.२,पृ.५६,कारिका.२७)

उपसंहारः-

एवं प्रकारेण रूपकेषु नायिकाभेदाः प्रतिपादिताः वर्तन्ते।

- - -

साहित्यविभागः
राष्ट्रियसंस्कृतविद्यापीठम्
तिरुपतिः